मरणे यं जपं जाप्यं यं च भावमनुस्मरन् ।
परं पदमवाप्नोति तन्मे वद महामुने ॥

* * * *

भगवानुवाच—

अहं तत्ते प्रवक्ष्यामि मुने दिव्यामनुस्मृतिम् ।
मरणे यामनुस्मृत्य प्राप्नोति परमां गतिम् ॥
ओंकारमादितः कृत्वा मामनुस्मृत्य मन्मनाः ।
एकाग्रः प्रयतो भूत्वा इमं मन्त्रमुदीरयेत् ॥

ओं नमो भगवते वासुदेवाय ।

अस्य श्रीअनुस्मृतिमहामन्त्रस्य नारायण ऋषिः, परमात्मा श्रीमहाविष्णुर्देवता, अनुष्टुप छन्दः, मोक्षार्थे जपे विनियोगः ।

अनन्तशाश्वतं देवमव्यक्तं पुरुषोत्तमम् ।
प्रपद्ये प्राञ्जलिर्विष्णुमव्ययं पुरुषोत्तमम् ॥

End:

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।
गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥

Colophon

इति श्रीमन्महाभारते शान्तिपर्वणि वेदानुस्मृतिः संपूर्णा ।

R. No. 487.

Palm-leaf. $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 61 Lines, 8 in a page. Telugu. Injured.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

(*a*) षडशीतिः—सव्याख्या.

ṢAḌAŚĪTIḤ WITH COMMENTARY.

Foll. 1*a*—4b.

Same work as the one described under No. 3011 of the D C.S. MSS., Vol. V.

Breaks off in the Asagōtraprakaraṇa.

(*b*) अभिनवषडशीतिः—धर्मप्रदीपिकासहिता.

ABHINAVAṢAḌAŚĪTIḤ WITH DHARMAPRADĪPIKĀ.

Foll. 5*a*—61*b*. Fol. 33 is left blank.

Same work as the one described under No. 3011 of the D.C.S. MSS., Vol. V.

The stanzas which are generally given in the beginning are here written at the end.

Complete; wants beginning.

R. No. 488.

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 105. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

(*a*) परिषत्प्रायश्चित्तविधिः.

PARIṢATPRĀYAŚCITTAVIDHIḤ.

Foll. 1*a*—8*b*.

Similar to the work described under R. No. 65(*p*) *ante*.

Complete.

(*b*) विश्वनाथनगरीस्तोत्रम्

VIŚVANĀTHANAGARĪSTŌTRAM.

Fol. 9.

This work contains eight stanzas describing the religious sanctity of the sacred city named Viśvanāthanagarī, which is the modern Benares.

Complete.

Beginning:

सर्वतीर्थकृतमज्जनपुण्यैर्जन्मजन्मनि कृतैः खलु लभ्या ।
प्राप्यते भवभयार्तिनाशनी विश्वनाथनगरी गरीयसी ॥

End:

विश्वनाथनगरीस्तवनं तत् यः पठेत्प्रयतमानसः पुमान् ।
पुत्रपौत्रधनधान्यसंयुतं(तो)मोक्षमार्गगमनं लभेत्पुमान् ॥

Colophon:

इति विश्वनाथनगरीस्तवनं संपूर्णम् ॥

(*c*) शिवषडक्षरस्तोत्रम्.

ŚIVAṢAḌAKṢARASTŌTRAM.

Fol. 10.

Same work as the one described under R. No. 324 (*h*). Its due repetition is held to enable one to become united with Śiva.

Complete.

Beginning:

ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैवमोंकाराय नमो नमः ॥

* * * *

शिवं शान्तं जगन्नाथं लोकानुग्रहकारकम् ।
शिवमेकपरं वन्दे शिकाराय नमो नमः ॥

End :

षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
शिवसायुज्यमाप्नोति शिवेन सह मोदते ।

(*d*) कालभैरवाष्टकम्.

KĀLABHAIRAVĀṢṬAKAM.

Foll. 10*b*—11*b*.

Eight stanzas in praise of Kālabhairava (a manifestation of Śiva) as worshipped in Benares.

Complete.

Beginning :

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं काशिकापुराधिनाथकालभैरवं भजे ॥

End :

कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिलो(ला)भदायकं प्रसन्नपुण्यवर्धनम् ।
शोकमोहलोभदैन्यकोपतापनाशनं
काशिका . . . . भजे ॥

Colophon :

विश्वेश्वरा(कालभैरवा)ष्टकं संपूर्णम् ॥

(*e*) विश्वनाथाष्टकम्.

VIŚVANĀTHĀṢṬAKAM.

Foll. 11*b*—13*a*.

Eight stanzas in praise of Śiva worshipped under the name of Viśvanātha in Kāśī. The colophon at the end attributes the authorship of these stanzas to Vyāsa.

Complete.

Beginning :

गङ्गातरङ्गकमनीयजटाकलापं गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम् ॥

End :

वाराणसीपुरपतेः परमेश्वरस्य व्यासोक्तमष्टकमिदं पठते मनुष(ष्य): ।
विद्याश्रयं विपुलसौख्यमनन्तकीर्तिं संप्राप्य देहविलये लभते क्ष(च)मोक्षम ॥

Colophon :

इति श्रीवेदव्यासविराचित विश्वनाथाष्टकं संपूर्णम् ॥

(*f*) अन्नपूर्णेश्वर्यष्टकम्.

ANNAPŪRṆĒŚVARYAṢṬAKAM.

Foll. 13*a*—14*b*.

Eight stanzas in praise of the goddess Annapūrṇēśvarī as worshipped in Benares.

Complete.

Beginning :

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

End :

अन्नपूर्णे सदा पूर्णे शंकर[:]प्राणवल्लभ:(भे) ।
ज्ञानवैराग्यसिध्यर्थं भिक्षां देहि च पार्वति ॥

(*g*) मणिकर्णिकाष्टकम्.

MAṆIKARṆIKĀṢṬAKAM.

Foll. 14*b*—16*b*.

Same work as the one described under R. No. 226 *b*).

Complete.

(*h*) बिन्दुमाधवाष्टकम्.

BINDUMĀDHAVĀṢṬAKAM.

Foll. 16*b*—18*a*.

Eight stanzas in praise of Viṣṇu worshipped under the name of Bindumādhava in Benares.

Complete.

Beginning:

कलिन्दजातपाट्टती(टाटवी)लतान्नि(नि)केतनान्तरं(र)-
प्रगल्भवल्लवीस्फुरद्य्र(द्र)तिप्रसङ्गसंगतम् ।
सुधारसाररौद्र(धरार्द्र)वेणुनादमाधुरीमद-
प्रमत्तगोपगोव्रजं भजामि बिन्दुमाधवम् ॥

End:

प्रशस्तपञ्चचामराख्यवृत्तभेदनिर्मितं
दशावतारवर्णनं नृसिंहभक्तवार्णितम् ।
प्रसिद्धबिन्दुमाधवाष्टकं पठन्ति ये नराः
सुदुर्लभं भजन्ति ते मनोरथं निरन्तरम् ॥

(*i*) बीजभैरवाष्टकम्.

BĪJABHAIRAVĀṢṬAKAM

Foll. 18*a*—20*a*.

Eight stanzas in praise of Bhairava, a manifestation of Śiva, as worshipped in Benares. The work is attributed to Śaṅkarācārya. It is called Bījabhairavāṣṭaka probably because every line in each stanza begins with certain significant letters contained in the Mantra relating to the deity.

Complete.

Beginning:

यं यं यं यक्षरूपं दशांदेशवसनं भूमिकम्पायमानं
[सं] सं सं संहारमूर्तिं शशिमकुटजटाशङ्ख(शेख)रं चन्द्रवर्णम् ।

दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

End :

हं हं हं अ(हा)ट्टहासं हसितमिदमिदं मुक्तिदं स्नेह(मा)न्यं
घं धं धं स्नानरूपं घनकपिलजटाबन्धबन्धाग्रहालिम् ।
[टं] टं टं टंकारनादं त्रिदशदशदिशं कामदर्पप्रवाहं(सं)
भूं भूं भूं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं बीजभैरवाष्टकं संपूर्णम् ॥

(*j*) तत्त्वमसिपञ्चकम्.

TATTVAMASIPAÑCAKAM.

Foll. 20*a*—21*a*.

Five stanzas on the ultimate identity of the individual soul with the Supreme Brahman as implied in the Vedic passage, Tattvamasi.

Complete.

Beginning :

अम्बरमनोरमणिबिम्बमनुबिम्बं भङ्गिसुतरङ्गगुणसंगविवियुद्धा(तिविशुद्धम्) ।
बुद्धिगुणबद्धमिव यस्तदनुचित्तं तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन् ॥

End :

कोशमल(य)पञ्चकमिदं च सविकारं
यत्र वियदादि विमलं स्यहतेमेवरं(स्फुरितमेतत) ।
अस्ति न कदाचिदिह राज्यवदनं(वा)
तत्त्वमासि तत्त्वमासि तत्त्वमासि राजन् ॥

(*k*) रामरक्षाकवचस्तोत्रम्.

RĀMARAKṢĀKAVACASTŌTRAM.

Foll. 21*a*—28*a*.

This Kavacamantra is addressed to Rāma. Its repetition is held to be efficacious in removing sin and in counteracting the evils caused by wicked spirits and in the accomplishment of one's desires.

Complete.

Beginning:

अस्य श्रीरामरक्षाकवचस्तोत्रमहामन्त्रस्य बुधशौनकपुत्रो विश्वामि(त्र)-ऋषिः, अनुष्टुप् छन्दः, श्रीसीतालक्ष्मणसहितश्रीरामचन्द्रो देवता, श्रीं बीजम्, श्रीं शक्तिः, मां कीलकम्, मम समस्तपापक्षयार्थे भूतप्रेतपिशाच-सर्वोपद्रवशान्त्यर्थे मम सकलमनोरथसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ध्यानम्—

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

End:

श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि ।
(श्रीरामचन्द्रचरणौ शिरसा नममि)
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥

Colophon:

इति श्रीमद्विश्वामित्रेण विरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ॥

Fol. 28*b* contains two stanzas in praise of Rāma.

(*l*) हनूमद्व्रतकल्पः.

HANŪMADVRATAKALPAḤ.

Fol. 29*a*—40*b*. Fol. 38*b* is blank

On details connected with the observance of a Vrata on the banks of the pool Pampā with a view to propitiate Hanumat. The concluding stanzas describe the efficacy of this Vrata.

Complete, as found in the Bhaviṣyōttarapurāṇa.

Beginning:

तत्र हनूमद्व्रतं कर्तुकामः आर्षाचारानुसारेण शिष्टाचारपरम्परया प्राप्तां यथाशक्ति संपादितैर्द्रव्यैः पम्पापूजां करिष्ये इति संकल्प्य, मार्गशिरमासे शुक्लत्रयोदश्यां त्रयोदशवर्षात्मकं करिष्यमाणः—

द्वादश्यामेव नियतो ब्रह्मचारी जितेन्द्रियः ।
सम्यग्गात्रं यापयित्वा संस्तवैः परमात्मनः ॥

* * * *

पूर्वं हनूमतः पूजा कृता पम्पासरित्तटे ।
तस्मात्पम्पासरित्तीरे कर्तव्यं हनुमद्व्रतम् ॥

End:

एतं हनूमतो यस्तु भक्तियुक्तेन चेतसा ।
स राजद्वारयुद्धे च सभायां व्यवहारके ॥

द्यूते च स्वापने चैव व्याघ्रसिंहभयेषु च ।
समस्तकार्योद्योगेषु सर्वत्र विजयी भवेत् ॥

त्रयोदशग्रन्थियुक्तं व्रतदोरं हनूमतः ।
धारयेद्यः कण्ठमूले दक्षिणेऽप्यथवा करे ॥

तस्य सर्वाभीष्टसिद्धिर्भवत्येव न संशयः ।

* * * *

नमस्ते नमस्ते महावायुसूनो नमस्ते नमस्ते भविष्यद्विधातः ।
नमस्ते नमस्ते मनोऽभीष्टदातो नमस्ते नमस्तेऽनिशं रामभक्त ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे हनूमद्व्रतकल्पः संपूर्णः ॥

(*m*) वेङ्कटेशद्वादशनामस्तोत्रम्.

VĒṄKAṬĒŚADVĀDAŚANĀMASTŌTRAM.

Fol. 41*a*.

In praise of Vēṅkaṭēśa worshipped on the Tirupati hills under twelve significant names.

Complete, as found in the Brahmāṇḍapurāṇa.

Beginning:

अस्य श्रीवेङ्कटेशद्वादशनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीवेङ्कटेश्वरो देवता, इष्टार्थे विनियोगः ।

नारायणो जगन्नाथो वारिजासनवन्दितः ।
स्वामिपुष्करिणीवासः शङ्खचक्रगदाधरः ॥

End:

एतानि द्वादश (द्वादशैतानि) नामानि त्रिसंध्यं यः पठेन्नरः ।

* * * *

इह जन्मनि सौख्यं च विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे वेङ्कटेशद्वादशनामस्तोत्रं संपूर्णम् ॥

(*n*) वेङ्कटेशकवचः.

VĒṄKAṬĒŚAKAVACAḤ.

Foll. 41*b*—42*a*.

This Kavacamantra is addressed to Vēṅkaṭēśa, and its repetition is said to be efficacious in bringing about the accomplishment of one's desires.

Complete, as found in the Āgnēyapurāṇa.

Beginning:

अस्य श्रीवेङ्कटेशकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीवेङ्कटेश्वरो देवता, ओं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, इष्टार्थे विनियोगः ।

* * * *

वराहः पातु मे शीर्षं केशान् श्रीवेङ्कटेश्वरः ।
शिखामिलापतिः कर्णौ ललाटं दिव्यविग्रहः ॥

End:

रोगाः प्रशमनं यान्ति त्रिर्जपेद्भानुवासरे ।
सर्वसिद्धिमवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीमदाग्नेयपुराणे वेङ्कटाचलमाहात्म्ये वसिष्ठनारदसंवादे वेङ्कटेशदिव्यकवचस्तोत्रं नाम पञ्चदशोऽध्यायः ॥

(*o*) वेङ्कटेशाष्टोत्तरशतनामावलिः.
VEṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 42*b*—45*b*.

Enumerates one hundred and eight significant names in praise of Vēṅkaṭēśa.

Complete, as found in the Varāhapurāṇa.

Beginning:

मुनय ऊचुः—

सूत सर्वार्थतत्त्वज्ञ सर्ववेदान्तपारग ।
येन चाराधितः सद्यः श्रीमद्वेङ्कटनायकः ॥

सूतः—

अष्टोत्तरशतैर्दिव्यैर्नामभिर्मुनिपूजितैः ।
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥

* * * *

श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय च ।
शेषपर्वतरूपत्वप्रशासनपराय च ॥

* * * *

ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ।
वृषदृग्गोचरायाथ विष्णवे सततं नमः ॥

End:

इति शेषेण कथितं कपिलाय महात्मने ॥
कपिलाख्यमहायोगिसकाशात्तु मया श्रुतम् ।
तदुक्तं भवतामद्य सद्यः प्रीतिकरं शुभम् ॥

Colophon:

इति श्रीवराहपुराणे क्षेत्रकाण्डे वेङ्कटाचलमाहात्म्ये कपिलशेषसंवादे वेङ्कटेशाष्टोत्तरशतदिव्यस्तोत्रनाम एकषष्टितमोऽध्यायः ॥

(*p*) वेङ्कटेशपञ्चकम्.

VĒṄKAṬĒŚAPAÑCAKAM.

Fol. 46*a*. Fol. 46*b* is left blank.

Five stanzas in praise of Vēṅkāṭēśa.

Complete.

Beginning:

श्रीधरादिनायकं श्रितापवर्गदायकं
श्रीगिरीशमित्रमम्बुजेक्षणं विचक्षणम् ।
श्रीनिवासमादिदेवमक्षरं परात्परं
नागराड्गिरीश्वरं नमामि वेङ्कटेश्वरम् ॥

End:

तारहारक्षीरशारदाभ्रतारकेशकीर्तिविहारमादिमध्यान्तशून्यमव्ययम् ।
तारकासुराटवीकुठारमद्वितीयकं नागराड्गिरीश्वरं नमामि वेङ्कटेश्वरम् ॥

Colophon:

इति श्रीवेङ्कटेशपञ्चकं संपूर्णम् ॥

(q) वेङ्कटेशदयितासुप्रभातानि.

VĒṄKAṬĒŚADAYITĀSUPRABHĀTĀNI.

Foll. 47a—49a.

A number of stanzas addressed to Vēṅkaṭēśa and wishing good morning.

Complete.

Beginning:

मातुस्समस्तजगतां मधुकैटभारेर्वक्षोविहारिणि मनोहरदिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रियदानशीले श्रीवेङ्कटेशदयिते तव सुप्रभातम् ॥

तव सुप्रभातमरविन्दलोचने भवतु प्रसन्नमुखचन्द्रमण्डले ।
विधिशङ्करेन्द्रवनिताभिरर्चिते वृषशैलनाथदयिते तव सुप्रभातम् ॥

अत्र्यादिसप्तऋषयस्समुपास्य सन्ध्या-
माकाशसिन्धुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्ना-
श्शेषाद्रिशेखर विभो तव सुप्रभातम् ॥

End:

धाटीषु ते विहगराजमृगाधिराजनागाधिराजगजराजहयाधिराजाः ।
स्वस्वाधिकारमहिमाधिकमर्थयन्ते श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

भास्वानुदेति विकचानि सरोरुहाणि संपूरयन्ति निनदैः ककुभो विहङ्गाः ।
श्रीवैष्णवाः सततमङ्गलमर्थितास्ते धावन्ति केत(श)व हि वेङ्कट सुप्रभातम् ॥

इत्थं वृषाचलपतेरिह सुप्रभातं ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां प्रज्ञां परार्थसुलभां परमां प्रसूते ॥

(*r*) मन्युसूक्तम्.

MANYUSŪKTAM.

Fol. 49*b*.

Same work as the one described under No. 231 of the D.C.S MSS., Vol. I, Part II.

Incomplete.

(*s*) वार्तालीस्तवः.

VĀRTĀLĪSTAVAḤ.

Fol. 50.

In praise of Vārtālī, the presiding goddess of music.

Complete.

Beginning:

तत्रालये विशाले तपनीयारचिततरलसोपाने ।
माणिक्यमण्डपान्ते महति च सिंहासने च मणिखचिते ॥

* * * *

आम्नायसारगुलिकामाद्यां संगीतमातृकां वन्दे ॥

End:

धूर्तानामतिदूरा वार्ताशेषावलग्नकमनीया ।
आर्तालीफलदात्री वार्ताली भवतु वाञ्छितार्थाय ॥

(*t*) देवीमालामन्त्रः.

DEVĪMĀLĀMANTRAḤ.

Foll. 51*a*—52*b*.

Similar to the work described under No. 6428 of the D.C.S. MSS., Vol. XIII.

Complete.

(*u*) शिशुपालवधः—सव्याख्यः.

ŚIŚUPĀLAVADHAḤ WITH COMMENTARY.

Foll. 53*a*—71*a*. Fol. 71*b* is blank.

A famous poem in 20 Sargas: by Māgha. The author of the commentary is Mallinātha.

Contains the sixth Sarga only.

(*v*) शिववेदपादस्तवः.

ŚIVAVĒDAPĀDASTAVAḤ.

Foll. 72*a*—80*b*.

A hymn in praise of Śiva, the last quarter of each stanza in it ending with a Vedic passage. The authorship is attributed to Jaimini.

Complete, as found in the Brahmāṇḍapurāṇa.

Beginning:

शौनकाद्या ऋषय ऊचुः—
पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥
सूतः—भगवान् जैमिनिर्धीमान् पुण्डरीकपुरे पुरा ।

* * * *

कृताञ्जलिरुवाचेदं वेदान्तस्तवमुत्तमम् ।
विघ्नेशविधिमार्ताण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥

End:

पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु वान्छ(च)यते नित्यं शिवलोकं स गच्छति ॥

Colophon:

इति श्रीमदखिलविद्यावद्यासकृतब्रह्माण्डपुराणे जैमिनिकृतवेदपादस्तवः संपूर्णः ॥

(*w*) तृचकल्पः.

TṚCAKALPAḤ.

Foll. 81*a*—85*b*.

Similar to the work described under No. 7850 of the D.C.S. MSS., Vol. XV.

Incomplete.

(*x*) हनुमन्मालामन्त्रः.

HANUMANMĀLĀMANTRAḤ.

Foll. 86*a*—87*b*.

Similar to the work described under No. 7678 of the D.C.S. MSS., Vol. XIV.

Complete.

(*y*) दुर्गैकाक्षरीमन्त्रः.

DURGAIKĀKṢARĪMANTRAḤ.

Fol. 88*a*.

Similar to the work described under No. 6420 of the D.C.S. MSS., Vol. XIII.

Complete.

(*z*) बन्धविमोचनीमन्त्रः—प्रयोगसहितः.

BANDHAVIMŌCANĪMANTRAḤ WITH PRAYŌGA.

Foll. 88*b*—89*b*.

Similar to the work described under No. 6728 of the D.C.S. MSS., Vol. XIII.

Complete.

(*a*') अर्धनारीश्वराष्टोत्तरशतनामावलिः.

ARDHANĀRĪŚVARĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 90*a*—97*a*. Fol. 97*b* is left blank.

One hundred and eight names in praise of Śiva conceived as being half male and half female.

Complete, as found in the Śivapurāṇa.

This work is said to have been copied on Wednesday, the 11th of the dark fortnight in the month of Āśvija (Aippaśi), in the year Śubhakṛt, from the manuscript belonging to Jayanti Sarvāvadhāni.

Beginning :

श्रीलक्ष्मीरुवाच—

नारायण जगन्नाथ सर्वमङ्गलदायकम् ।
उपायं पुत्रदं देव ब्रूहि केशव ते नमः ॥

* * * *

अस्य श्रीअर्धनारीश्वराष्टोत्तरशतयुग्मनामावलीस्तोत्रमन्त्रस्य श्रीमन्नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीअर्धनारीश्वरो देवता, ममार्धनारीश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

चन्द्रकोटिप्रतीकाशं त्रिणेत्रं चन्द्रभूषणम् ।

* * * *

भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभाम् ॥

* * * *

एवं ध्यात्वा महादेवं देवीं च गिरिकन्यकाम् ।
पठेन्नामावलीस्तोत्रं सर्वसंपत्समृद्धये ॥
रजताचलशृङ्गारगृहस्थायै नमो नमः ।
महाकैलासशिखरनिलयाय नमो नमः ॥

End :

य इदं शृणुयान्नित्यं श्रद्धाभक्तिसमन्वित- ।
इह भुक्त्वाखिलान् भोगानन्ते देवो भवेच्च सः ॥

Colophon :

इति श्रीशिवपुराणे लक्ष्मीनारायणसंवादे अर्धनारीश्वराष्टोत्तरशतयुग्मदिव्यनामावलीस्तोत्रं संपूर्णम् ॥

(b[1]) महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Foll. 98a—102a. Fol. 102b is left blank.

Same work as the one described under R. No. 399 (a) *ante.*

Complete.

The copying of this work is said to have been completed by Sōyaṇamantra Lakṣmaṇṇa on the 10th of the dark fortnight in the month of Āśvija in the year Vikṛti.

(c[1]) लक्षतुलसीव्रतकल्पः.

LAKṢATULASĪVRATAKALPAḤ.

Foll. 103a—105b.

Similar to the work described under No. 8440 of the D.C.S. MSS., Vol. XVI. It is, as the name implies, a vow to propitiate Viṣṇu to whom Pūjā is offered a lakh of times with the leaves of the Tulasī plant.

Complete.

Beginning:

अथ राजन् प्रवक्ष्यामि लक्षश्रीतुलसीव्रतम् ।
विष्णुप्रीतिकरं नणां विष्णुभक्तिविवर्धनम् ॥
लक्षपूजाविधिं वक्ष्ये शृणु भूप समाहितः ।
यत् कृत्वा मुच्यते पापैर्नारी वा पुरुषोऽपि वा ॥
ब्रह्महा गुरुगामी च मद्यपो वा धनापहः ।
सकृत्पूजनमात्रेण मुच्यते किमु नित्यशः ॥

* * * *

माघे वा कार्तिके चैत्रे आषाढे श्रावणेऽपि वा ।
अन्येषु शुभमासेषु व्रतमेतत्समाचरेत् ॥
देवपूजागृहे वापि देवालयसमीपतः ।
गोमयेनानुलिप्याथ धातुना मृन्मयेन च ॥
चतुर्भिर्ब्राह्मणैः सार्धं कृत्वा च स्वस्तिवाचनम् ।
नान्दीश्राद्धं प्रकुर्वीत लक्षपूजाविधौ द्विजः ॥

End :

लक्षसंख्याक्रमेणैव पूजयेच्च सदा व्रती ।
उद्यापनं प्रकुर्वीत पूर्वोक्तेनैव मार्गतः ॥
अन्यथा दोषमाप्नोति हीनाङ्गो जायते भुवि ।

* * * *

तुलसीगन्धमाघ्राय इह मुक्तिमवाप्नुयात् ।
एतत्पूजाविधानेन किं पुनर्मनुजो नृप ॥

R. No. **489.**

Paper. 6½ × 4⅝ inches. Foll. 6. Lines, 7 in a page. Dēvanāgarī. Good.

Presented in 1911–12 by C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) अश्वारूढामन्त्रः.

AŚVĀRŪḌHĀMANTRAḤ.

Foll. 1*a*—2*b*.

Same work as the one described under No. 5897 of the D.C.S MSS., Vol. XII. With Pūjā.

Complete.

(*b*) अश्वारूढास्तोत्रम्.

AŚVĀRŪḌHĀSTŌTRAM.

Foll. 3*a*—4*b*.

Similar to the above.

Complete.

Beginning :

ईश्वर उवाच—

अश्वारूढे रक्तवर्णे स्मितसौम्यमुखाम्बुजे ।
राजस्त्रीसर्वजन्तूनां वशीकरणनायिके ॥

End:

वश्यस्तोत्रमिदं देव्यास्त्रिसंध्यं यः पठेन्नरः ।
सोऽभीष्टं वशयेत्सर्वं रामराज्यमथापि वा ॥

Colophon:

इति श्रीस्वप्नवाराहीस्तोत्रं संपूर्णम् ॥ इति गन्धर्वतन्त्रे अश्वारूढास्तोत्रम् ॥ अयुतपाठेन राजादिवशीकरः ॥

(*c*) प्रदोषस्तोत्रम्.

PRADŌṢASTŌTRAM.

Foll. 5*a*—6*a*.

Enjoins the worship of Śiva at the time of Pradōṣa

Complete. as found in the Brahmōttarakhaṇḍa of the Skāndapurāṇa.

Beginning:

सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तो सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥

End:

अत्र प्रदोषे शिव एक एव पूज्योऽथ नान्यो हरिपद्मजाद्यः ।
तस्मिन् महेशे विधिनेज्यमाने सर्वे प्रसीदन्ति सुराधिनाथाः ॥

* * * *

अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ।
तद्दोषपरिहारार्थं शरणं यातु शंकर(म्) ॥

Colophon:

इति श्रीस्कान्दपुराणे ब्रह्मोत्तरखण्डे प्रदोषस्तोत्रं संपूर्णमस्तु ॥

Fol. 6*b* contains a few stanzas in priase of Śiva.

R. No. **490.**

Palm-leaf. $13\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 32. Lines, 5 in a page. Telugu. Good.

Presented in 1911–12 by C. Viśvanātha Śāstrigal of Vizianagaram.

(a) మన్త్రసారార్థదీపిక.

MANTRASĀRĀRTHADĪPIKA.

Foll. 1a—11b. Fol. 12a is left blank

See the Telugu part of this Triennial Catalogue.

(b) अष्टश्लोकी—आन्ध्रटीकासहिता.

AṢṬAŚLŌKĪ WITH TELUGU COMMENTARY.

Foll. 12b—32b.

Same work as the one described under No. 171(d) ante.

Complete.

R. No. 491.

Palm-leaf. 15 × 1⅛ inches. Foll. 95. Lines, 9 in a page. Grantha. Good.

Presented in 1911-12 by Śrīraṅga-Nārāyaṇajīyar of Srirangam. The name of the former owner of the MS. is given as follows;—

इदं पुस्तकं भक्तवत्सलश्रीनिवासाचार्यस्य.

(a) वरवरमुनिदिनचर्या—सव्याख्या.

VARAVARAMUNIDINACARYĀ WITH COMMENTARY.

Foll 1a—70b.

The text which is by Dēvarājārya is the same as the one described under R. No. 173(e) ante; the commentary, called Sadācāradīpika, is by Vādhūla Vīrarāghava, a disciple of Varadārya.

Complete.

The copying of this work is said to have been completed on Sunday, the 3rd of the month of Āḍi and the 12th day of the bright fortnight, in the year Raktākṣi.

Beginning:

वन्दे यद्भक्तिसाराख्यं सौदर्शनमहं महः ।
ययौ जङ्गमतां येन वेगासेतुर्विभावितः ॥
दिनचर्यां व्याकरोमि देवराजार्यनिर्मिताम् ।
वरदार्यदयानिघ्नो वाधूलो वीरराघवः ॥

तत्रभवान् वरवरमुनिदासापरनामधेयो देवराजगुरुः, गुरोर्नाम सदा-जपेत्। तदधीनश्च वर्तेत साक्षान्नारायणो हि सः।

* * * *

निर्विघ्नपरिसमाप्त्यर्थं स्वाधिकारानुरूपं गुरुनमस्काररूपं मङ्गलमाचरति—

अङ्के कवेरकन्यायास्तुङ्गे भुवनमङ्गले।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम्॥

इयं हि दिनचर्या पङ्क्तिपावनं भगवन्तं वरवरमुनिमाधिकृत्य प्रवृत्ता॥

End:

सर्वान् कामान् समश्नुत इत्यनेन सोऽश्नुते सर्वान् कामानित्यस्य परमेण विपश्चितेत्यनेन सह ब्रह्मणा विपश्चितेत्यस्यार्थश्चोपबृंहित इति रमणीयम्॥

स्वयंप्रमाणेऽप्याचारे सौम्यजामातृयोगिनः।
स्मृतिप्रपञ्चनं तज्ज्ञास्तुष्यन्त्विति मया कृतम्॥

Colophon:

इति दिनचर्याव्याख्यायां सदाचारदीपिकासमाख्यायामुत्तरदिनचर्या-विभागः॥ समाप्ता चेयं दिनचर्याव्याख्या॥

रक्ताक्षिहायने मासि कटके पाण्डरच्छदे॥
द्वादश्यां दिनचर्याख्यग्रन्थव्याख्यान्तमाययौ

(*b*) अष्टाक्षरब्रह्मविद्या.

ASṬĀKṢARABRAHMAVIDYĀ.

Foll. 71*a*—86*a*. Fol. 86*b* is left blank.

On certain details connected with the repetition of the well-known eight-syllabled prayer formula of the Śrī-Vaiṣṇavas. The authorship of the work is attributed to the divine sage Nārada.

Adhyāyas 1 to 4, complete.

The transcription of this work is said to have been completed by Pattarāvi Śrīnivāsan on the 10th of Mārgali in the year Krōdhi.

Beginning:

ऋषय ऊचुः—

हिरण्यगर्भसंभूतं सर्ववेदैकभाजनम् ।
प्रणम्य शिरसा ह्यूचुर्देवार्षिमृषिसत्तमाः ॥
अनुगृह्णीष्व भगवन् सर्वशास्त्रविशारद ।
अष्टाक्षरविधिं सम्यगस्माकं वद सुव्रत ॥
अष्टाक्षरस्य किंभूतं माहात्म्यं महदद्भुतम् ।
स्वरूपमपि किंभूतं वर्णतत्त्वस्वराश्च के ।
ऋषिः को नाम किं छन्दो देवर्षे का च देवता ।
किं बीजं का पुनः शक्तिः कान्यङ्गानि महामुने ॥

* * * *

इति पृष्टो मुनिश्रेष्ठो लोकानां हितकाम्यया ।
स तेभ्यः कथयामास प्रणम्य शिरसा हरिम् ॥
सर्वार्थसाधकस्याहं मूलमन्त्रस्य यो विधिः ।
प्रवक्ष्यामि यथापूर्वं मम प्रोक्तं स्वयंभुवा ॥
ब्रह्मणश्चाभवद्बीजं बीजादष्टाक्षरोऽभवत् ।
अष्टाक्षराच्च भूतानि भूतेभ्यो ह्यखिलं जगत् ॥

End:

मूर्धेक्षणास्यहृदयजङ्घांसपादद्वयेषु लिपिशो न्यस्य तं क्रमेण ।
गदांसदारुचरणेषुरथाङ्गशङ्खश्रीमत्पदाम्बुजयुगेषु समाहितात्मा

Colophon:

इत्यष्टाक्षरब्रह्मविद्यायां देवर्षिनारदप्रणीतायां चतुर्थोऽध्यायः ॥

(c) लोकाचार्यपञ्चाशत्.

LŌKĀCĀRYAPAÑCĀŚAT.

Foll. 87a—94a. Foll. 94b and 95 are left blank.

Fifty stanzas in praise of Lōkācārya, otherwise called Piḷḷailōkācārya. In a stanza given at the end the authorship is attributed to Vēdāntadēśika.

Complete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . संनिधत्तां सदा हृदि ॥

कावेरीपुलिनान्तराललहरीलावण्यमालालस-
त्पर्यङ्कीकृतपन्नगेश्वरतनौ निद्रानिबद्धादरम् ।
कस्तूरीतिलकाञ्चितं कमलजेनाराधितं श्यामलं
वस्तूरीकृतकौस्तुभं दिशतु नः स्वस्ति प्रशस्तं स्वतः ॥

* * * *

वाणीपुण्यसुधापगाः शठजितः स्वैरं विगाह्यादरा-
दानीयामृतमत्र चक्रतुरुभौ पानीयशालामुभौ ।
यौ वाग्भूषणदेशिकेन्द्रहृदयाभिख्यौ प्रबन्धोत्तमौ
तौ वन्दे भुवनार्यसुन्दरवरौ कृष्णात्मजौ देशिकौ ॥

End:

इत्थं जगद्गुरुवरप्रवणेन सर्व-
तन्त्रस्वतन्त्रकवितार्किकसिंहनाम्ना ।
श्रीवेङ्कटेशकविना कलितां स्तुतिं ये
स्निग्धाः पठन्ति भुवि यान्ति परां श्रियं ते ॥

प्रणतार्तिहरांशाय प्रकृष्टगुणशालिने ।
लीलयोद्धृतलोकाय लोकार्यगुरवे नमः ॥

कवितार्किक . . . . . . गुरवे नमः ॥

R. No. **492.**

Paper. 12½ × 4 inches. Foll. 105. Lines, 7 in a page. Dēvanāgarī. Good.

Presented in 1911–12 by C. J. Rāmacandra Rao of Madras.

ब्रह्मसूत्रानुव्याख्यानम्.

BRAHMASŪTRĀNUVYĀKHYĀNAM.

Same work as the one described under No. 4819 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **493.**

Paper. 10¼ × 5½ inches. Foll. 14. Lines, 11 in a page. Dēvanāgarī. Good.

Presented in 1911–12 by C. J. Rāmacandra Rao of Madras.

ईशावास्योपनिषद्भाष्यटीका.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAṬĪKĀ.

Foll. 1*a*—12*b*. The remaining leaves are left blank.

A commentary on the Īśāvāsyōpaniṣadbhāṣya of Ānandatīrtha: by Jayatīrtha.

Complete.

Beginning:

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान् पातु नो हरिः ॥

काण्वीं मन्त्रोपनिषदं यथावत् व्याकरिष्यन् भगवान् आर्याश्चिकीर्षिताविघ्नपरिसमप्त्यादिप्रयोजने प्रतिपाद्य देवतास्तुतिनती प्रथमं निबध्नाति— नित्येति । सर्वयज्ञभुज इति । सर्वयज्ञभोक्तृत्वात् यज्ञनाम्न इत्यर्थः । यथोक्तम्—सुखरूपस्य भोक्तृत्वात् इति ।

End:

अभ्यधिकमित्रं निरतिशयोपकारकारि परमप्रीतिविषयं चेति ॥

कमलावदनाम्भोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य याज्ञियोपनिष-द्भाष्यस्य टीका जयतीर्थभिक्षुविरचिता समाप्ता ॥

R. No. **494.**

Paper. $15\frac{1}{2} \times 4\frac{1}{4}$ inches. Foll. 101. Lines, 9 in a page. Bengali. Good.

Presented in 1911-12 by Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ: GĀDĀ-DHARĪ.

Same work as the one described under No. 4045 of the D.C.S. MSS., Vol. VIII.

Contains Vyadhikaraṇadharmāvacchinnābhāvakhaṇḍana.

R. No. **495.**

Paper. $15\frac{1}{2} \times 4\frac{1}{4}$ inches. Foll. 45. Lines, 8 in a page. Bengali. Good.

Presented in 1911-12 by Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ: GĀDĀ-DHARĪ.

Same work as the one described under No. 4041 of the D.C.S MSS., Vol. VIII.

Contains Siddhāntalakṣaṇa incomplete.

R. No. **496.**

Paper. $12\frac{1}{2} \times 3\frac{3}{4}$ inches. Foll. 43. Lines, 8 in a page. Bengali. Good.

Presented in 1911-12 by Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ: GĀDĀ-DHARĪ.

Same work as the one described under No. 4066 of the D.C.S. MSS., Vol. VIII.

Contains Pakṣatā incomplete.

R. No. 497.

Paper. $15\frac{5}{8} \times 4\frac{3}{8}$ inches. Foll. 23. Lines, 10 in a page. Bengali. Good.

Presented in 1911–12 by Rāmacandrayyar of Manalur.

तत्त्वचिन्तामणिव्याख्या—फक्किका.
TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Same work as the one described under No. 4019 of the D.C.S. MSS., Vol. VIII.

Contains Pūrvapakṣarahasya only.

R. No. 498.

Palm-leaf. $17 \times 1\frac{3}{8}$ inches. Foll. 53 Lines, 6 in a page. Telugu. Much injured.

Presented in 1911–12 by Vēṅkaṭayajvan of Tenali.

(a) तृचकल्पः.
TṚCAKALPAḤ.

Foll. 1a—3b.

Same work as the one described under No. 7850 of the D.C.S. MSS., Vol. XV.

Incomplete.

(b) सर्वप्रायश्चित्तप्रयोगः.
SARVAPRĀYAŚCITTAPRAYŌGAḤ

Foll. 4a—7b.

On the details of procedure to be observed in connection with the expiation of the sins of a person. It is stated to be necessary that an assembly of learned and holy persons should absolve him from his sins.

Complete.

Beginning:

एवं गुण . . . तिथौ अमुकगोत्रस्यामुकनामधेयस्य मम जन्मप्रभृति एतत्क्षणपर्यन्तं

* * * *

संभावितसकलप्रायश्चित्तं कर्तुकाम आदौ समस्तपापक्षयार्थं भस्मगोमयमृत्तिकास्नानं करिष्ये ।

End:

सर्वेभ्यः पापेभ्यो विमुक्तो भविष्यसीत्येषा परिषदाज्ञापयति पूतो भूयाः । परिषदपि एकवाक्येन तथास्त्विति ब्रूयात् । एवंगुण . तिथौ सर्वप्रायश्चिताङ्गभूतं गोदानानि(दि) कुर्यात् । परिषदे ब्राह्मणाय दद्यात् ॥

(*c*) स्त्रीप्रायश्चित्तप्रयोगः.

STRĪPRĀYAŚCITTAPRAYŌGAḤ.

Foll. 8*a*—12*b*.

On the details of procedure to be observed in connection with the expiation of the sins of a woman. Here also it is said to be necessary that an assembly of learned and holy persons should absolve her, by unanimous consent, from her sins.

Complete.

Beginning:

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ अमुकगोत्रे अमुकराशौ जाताया अमुकगोत्राया अमुकनामधेय्याः सर्वप्रायश्चितं करिष्यमाणः तदीयं पापजातं परिषत्संनिधौ निवेदयितुकामोऽहं मलापकर्षणार्थं स्नानं करिष्यामीति संकल्प्य ।

End:

बहुविधेभ्यः सर्वेभ्यः पापेभ्यस्त्वं पूता भविष्यसीत्येषा परिषदुपदिशतीति वदेत् । परिषदप्येकवाक्येन तथास्त्वित्युच्चैर्ब्रूयात् । ततो गोदानादिदशदानानि कृत्वा ब्राह्मणेभ्यो गन्धाक्षतान् दत्वा ताम्बूलानि दद्यात् ॥

(*d*) पञ्चगव्यहोमः.

PAÑCAGAVYAHŌMAḤ.

Foll. 13*a*—14*a*.

Similar to the work described under No. 3665 of the D.C.S. MSS., Vol. VII.

Complete.

Foll. 14*b*, 15 and 16*a* are left blank. Fol. 16*b* contains some stanzas dealing with Aupāsana which is a form of worship through a fire offering.

(*e*) आग्रयणान्वारम्भानुक्रमणिका.
ĀGRAYAṆĀNVĀRAMBHĀNUKRAMAṆIKĀ.

Foll. 17*a*—20*b*.

Gives a list of the successive rites to be performed in connection with the Āgrayaṇa sacrifices which consists in offering the first-gatherings of grains in the autumnal season.

Incomplete.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभ . . . .
संवत्सरे शरदि यक्ष्ये इत्यारम्भसंकल्पः । पुनः प्राणानायम्य . . .
त्यर्थे शरदि नवान्नप्राशनार्थमाग्रयण . . . .
ग्रयणेष्टं हविः । आमावास्यं तन्त्रम् । सप्तदश सामि ।

End:

श्यामाकचरुभक्षणम् । अमासि प्राणदद्दतं ब्रवीमि । अमासि सर्वा·
नासि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादमाम एधि ।

* * * *

द्यावापृथिव्योरिदं हविरजुषेतामवीवृधेतां म ।

(*f*) पुत्रसंग्रहणविधिः.
PUTRASAṄGRAHAṆAVIDHIḤ.

Foll. 21*a*—25*a*.

Similar to the work described under No. 3184 of the D.C.S. MSS., Vol. VI.

Complete.

(*g*) आशौचविषयः.
ĀŚAUCAVIṢAYAḤ.

Foll. 25*a*—30*b*. Fol. 31 is left blank.

Similar to the work described under No. 3031 of the D.C.S. MSS., Vol. V.

Wants beginning and end.

(*h*) ग्रहणवार्षिकम्.

GRAHAṆAVĀRṢIKAM.

Fol. 32.

Lays down rules for the performance of certain religious ceremonies, such as Śrāddha, if they happen to fall on a day of solar or lunar eclipse.

Wants beginning and end.

Beginning:

याह निमित्तस्यानियतत्वम् ।

स्नानादिकं विधायादौ तीर्थे मुण्डनमाचरेत् ।
अथोपवासनियमं कृत्वा श्राद्धं समाचरेत् ॥

* * * *

प्रयोगपारिजाते गोबिलः—

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः ॥

End:

संक्रान्तौ ग्रहणे पाते युगमन्वन्तरादिषु ।
भरण्यां चापि कुर्वीत श्राद्धं पिण्डैर्विनैव तु ॥

कालादर्शे—

(*i*) श्राद्धीयस्मृतिवचनानि.

ŚRĀDDHĪYASMṚTIVACANĀNI.

Foll. 33*a*—35*b*.

Similar to the work described under No. 3086 of the D.C.S. MSS., Vol VI.

Wants beginning and end.

(*j*) पुनराधानविधिः.

PUNARĀDHĀNAVIDHIḤ.

Foll. 36*a*—37*a*. Fol. 37*b* is left blank.

Gives details of ceremonial procedure for the kindling of the sacred fire maintained in a Brahmin's house, when, owing to any cause, it has not been regularly kept up.

Wants beginning and end.

Beginning:

अन्यान्यपि पुनराधाननिमित्तानि—हानिः सर्वस्वहानिः, अतोऽल्पधनहानि(र्न)निमित्तम् । पुत्रमरणं ज्ञातिषु राजादिभिः अपथेषु चक्षुराद्यङ्गनाशोऽङ्गवैधुर्यं पत्नीयज्ञाङ्गं तन्नाशोऽङ्गवैधुर्यमिति केचित् ।

End:

आत्मारोपिताग्निः यद्यपि उ(प)मर्येत, अनृतौ काममोहितः स्त्रियं वा गच्छेत्, पतितचण्डालादिभिर्वा स्पृश्येत, तत्रापि पुनराधानम् ।

(*k*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 38*a*—44*b*.

Same work as the one described under No. 1992 of the **D.O.S.** MSS., Vol. IV, Part I, with difference in the beginning.

The first Adhyāya only.

Beginning:

अस्य श्रीभगवद्गीताशास्त्रमहामालामन्त्रस्य श्रीवेदव्यासभगवानृषिः, प्रायेणानुष्टुप् छन्दः, कचिन्नाना छन्दांसि, श्रीकृष्णः परमात्मा देवता ।

* * * *

सारथ्यमर्जुनस्याजौ कुर्वन् गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥

Foll. 45—48 give information regarding the former owner of the MS.

(*l*) इष्टिप्रायश्चित्तम्.

IṢṬIPRĀYAŚCITTAM.

Foll. 49*a*—52*b*.

On the performance of the expiatory ceremony needed when the sacred fire Āhavanīya is not properly maintained by those who have taken part in Vedic sacrifices

Complete.

Beginning:

यद्यन्वाहिताग्नेराहवनीयानुगच्छेत् अन्वग्निरुषसामग्रमख्यत् इत्यन्नं प्रणीय, एवंगुण . तिथौ धर्मपत्नीसमेतस्य उपात्तदुरितक्षयद्वारा परमेश्वर-प्रीत्यर्थं यद्यन्वाहिताग्नेरन्वाधानेष्टिमध्ये आहवनीयानुगतप्रायश्चित्तं करिष्ये ।

End:

आहवनीये जुहोति । द्यावापृथिवीभ्यामिदं, काले सायमग्निहोत्रं जुहुयात् ।

Fol. 53 contains a few Dharmaśāstra stanzas.

R. No. **499.**

Paper. $6\frac{7}{8} \times 3\frac{1}{4}$ inches. Foll. 13. Lines, 9 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

ज्योतिरतिरात्रः.

JYŌTIRATIRĀTRAḤ.

Deals with certain preliminary rites connected with the performance of the Jyōtiṣṭōma sacrifice.

Complete.

Beginning:

अथाधान औद्गात्रप्रयोगः । तत्र मन्थनारम्भणकाले अरण्योः स्पृष्ट्वा अरण्योरिति साम त्रिर्गायेत् । अरण्योरित्यस्य साम्नो भरद्वाज ऋषिः, त्रिष्टुप् छन्दः, अग्निर्देवता, मथ्यमाने विनियोगः । अरण्यो[5]ः । निहितौ[1] जा[2] २४२ ते[2] वेदा[3 5]ः ।

* * * *

उदिते धूमे त्वेषस्ते धूम इति त्रिर्गायेत् । त्वेषस्ते धूम इत्यस्य यम ऋषिः, अनुष्टुप् छन्दः, अग्निर्देवता ।

End:

अथ स्तोमस्य शस्त्रोक्थस्य तिरोऽह्नस्य योऽश्वसानिरित्यादिहारियोजनभक्षणे विशेषः ॥

Colophon:

इति ज्योतिरतिरात्रः समाप्तः ॥

R. No. 500.

Palm-leaf. $5\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 60. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1911–12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

The first two leaves are left blank.

मन्त्रावलिः.

MANTRĀVALIḤ.

Similar to the work described under No. 6870 of the D.C.S. MSS., Vol. XIII.

Complete.

R. No. 501.

Palm-leaf. $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 93 Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1911–12 by P. Sōmayya of Tenali.

(*a*) आशौचविषयः.

ĀŚAUCAVIṢAYAḤ.

Foll. 1*a*—7*b*.

Similar to the work described under No. 3032 of the D.C.S. MSS., Vol. V.

Incomplete.

(*b*) हस्तामलकस्मृतिः—सव्याख्या.

HASTĀMALAKASMṚTIḤ WITH COMMENTARY.

Foll. 8*a*—79*b*.

A Dharmaśāstra treatise, by Rāmabhaṭṭa, a disciple of Vijñānēśvara, together with a commentary by himself.

Contains Ācārakāṇḍa, Āśaucakāṇḍa and Prāyaścittakāṇḍa.

Beginning:

यस्य स्मरणमात्रेण वाग्विभूतिर्विजृम्भते ।
सा भारती चिरं नित्य रमतां मन्मुखाम्बुजे ॥
नमस्यामि समारम्भे कर्मणां सिद्धये गुरुम् ।
गणाधिपमहं वन्दे त्रयीधर्मस्वरूपिणम् ॥
भानुमण्डलभेत्ता यः कैवल्ये समुपस्थिते ।
ब्रह्मा भवति तं वन्दे विज्ञानेश्वरयोगिनम् ॥

ग्रन्थारम्भे सदाचारमङ्गलप्राप्ततया अविगीतत्वेन प्राक् श्लोकद्वयेन इष्टदेवते नमस्कृत्य अपरेण विज्ञानेश्वरमुनिभट्टारकं नमस्कृत्य कश्चिच्छिष्यः याज्ञवल्क्यधर्मशास्त्रविवृतिमेधातिथिस्मृतिमहार्णवादिषु केषुचित् अतिविवृति(त)मिति मत्वानुग्रहं कर्तुं हस्तामलकमिमं ग्रन्थं निबध्नाति—तत्र वर्णा ब्राह्मणक्षत्रियविट्शूद्राश्च ।

* * * *

Colophon:

इति स्मृतिविवृतौ हस्तामलकाख्यायामाचारकाण्डः समाप्तः ॥

प्रकरणानुक्रमणिका—ब्रह्मचारिविवाहस्त्रीधर्मनक्षत्रशान्तिरद्भुतशान्तिश्राद्धप्रकरणद्रव्यशुद्धिप्रकरणवानप्रस्थयतय इति दशप्रकरण(मा)चारकाण्डे ।

चन्द्रार्कग्रहणादर्वाक् त्रिचतुःप्रहरान् क्रमान् ।
त्यक्त्वा ग्रस्तोद(स्ते द्व)योर्मुक्तिं दृष्ट्वा स्यात् स्नानपूर्वकम् ॥

Colophon:

इति विज्ञानेश्वरशिष्यपरिव्राजकश्रीरामभट्टविरचितायां हस्तामलकस्मृतिविवृतौ रहस्यप्रायश्चित्तकाण्डः समाप्तः ॥

प्रकरणानुक्रमणिका—प्रथममुपोद्घातब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पगमनतत्संयोगिप्रायश्चित्तविधिर्वेदपारायणप्रयोगविष्णुहृदयदानधर्मैकादशीनिर्णयसंक्रान्तिनिर्णयग्रहणनिर्णय इति पञ्चदश प्रकरणानि रहस्यप्रायश्चित्तकाण्डे ॥

विज्ञानेश्वरपादाब्जद्वन्द्वपूजाविधायिनः ।
परिव्राजकरामस्य कृतिरेषा विराजते ॥

(*c*) मासिश्राद्धप्रयोगः.
MĀSIŚRĀDDHAPRAYŌGAḤ.

Foll. 80*a*—85*a*. The remaining foll. are left blank.

Similar to the work described under No. 3756 of the D.C.S. MSS., Vol. VII.

Complete.

R. No. **502.**

Palm-leaf. 15⅝ × 1¼ inches. Foll. 95. Lines, 6 in a page. **Telugu.** Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

आपस्तम्बगृह्यसूत्रभाष्यम्—गृह्यतात्पर्यदर्शनम्.
ĀPASTAMBAGṚHYASŪTRABHĀṢYAM : GṚHYATĀTPARYADARŚANAM.

Foll. 1*a*—93*b*. Foll. 94 and 95 are left blank.

Same work as the one described under No. 1188 of the D.C.S. MSS., Vol. II.

Complete.

R. No. **503.**

Paper. $7\frac{1}{8} \times 3\frac{1}{4}$ inches. Foll. 45. Lines, 7 in a page. Dēvānagarī. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

Fol. 1*a* is left blank.

कालिकाकवचम्.

KĀLIKĀKAVACAM.

Similar to the work described under R. No. 401 *ante.*

Phalaśruti, incomplete.

R. No. **504.**

Paper. $9\frac{1}{2} \times 4$ inches. Foll. 578. Lines, 8 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by Rāmacandrayyar of Manalur.

Bound in 2 volumes.

निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

Same work as the one described under No. 3128 of the D.C.S. MSS., Vol. VI.

Breaks off in the third Paricchēda.

R. No. **505.**

Palm-leaf. $18 \times 1\frac{1}{8}$ inches. Foll. 210. Lines, 6 in a page. Telugu. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

Foll. 1*a*—207*b*.

Same work as the one described under No. 3128 of the D.C.S. MSS., Vol. VI.

Contains the third Paricchēda of which the beginning is wanting.

Foll. 208 and 209 are left blank. Fol. 210 contains a few stanzas on अविभाज्यद्रव्यानिरूपण.

R. No. **506**.

Palm-leaf. 16⅝ × 1¼ inches. Foll. 75. Lines, 7 in a page. Telugu. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḻ of Vizianagaram.

आह्निकम्.

ĀHNIKAM.

Similar to the work described under No. 2830 of the D.C.S. MSS., Vol. V.

Wants beginning and end.

R. No. **507**.

Palm-leaf. 19⅞ × 1⅝ inches. Foll. 131. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1911-12 by P. Sōmayya of Tenali.

(*a*) याज्ञवल्क्यस्मृतिः.

YĀJÑAVALKYASMṚTIḤ.

Foll. 1*a*—22*a*. Foll. 22*b* and 23 are left blank.

Same work as the one described under No. 2676 of the D.C.S. MSS., Vol. V.

Contains from the end of the first Adhyāya to the end of the third Adhyāya.

(*b*) कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Foll. 24*a*—127*b*.

Same work as the one described under No. 3109 of the D.C.S. MSS., Vol. VI.

Complete.

The transcription of the manuscript is said to have been completed by Gundu Lakṣmīnārāyaṇasōmayāji on the 1st day of the dark fortnight in the month of Caitra in the year Piṅgala.

The remaining leaves are left blank.

R. No. **508.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 168. Lines, 6 in a page. Telugu. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Tenali.

(*a*) रामायणम्.

RĀMĀYAṆAM.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

Same work as the one described under No. 1829 of the D.C.S. MSS., Vol. IV, Part I.

Contains the first Sarga of the Sundarakāṇḍa.

(*b*) काव्यदर्पणः.

KĀVYADARPAṆAḤ.

Foll. 5*a*—18*b*.

Same work as the one described under R. No. 1?1 *ante*.

Breaks off in the first Ullāsa.

(*c*) सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: TATTVABŌDHINĪ.

Foll. 19*a*—168*b*.

Same work as the one described under No. 1439 of the D.C.S. MSS., Vol. III.

Contains Uttarārdha incomplete.

R. No. **509**.

Palm-leaf. 17 × 1½ inches. Foll. 168. Lines, 8 in a page. Grantha. Good.

Presented in 1911-12 by the Secretary of the Sarasvatī-Bhāṇḍāgāram of Triplicane.

काव्यदर्पणः.

KĀVYADARPAṆAḤ.

Same work as the one described under R. No. 191 *ante*.
Breaks off in the seventh Ullāsa.

R. No. **510**.

Palm-leaf. 19⅛ × 1½ inches. Foll. 106 Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1911-12 by K. Rāmasvāmi Ayyaṅgār of Magadi.

(*a*) याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Foll. 1*a*—42*b*.

Same work as the one described under No. 2682 of the D.C.S. MSS., Vol. V.

Contains the Vyavahārakāṇḍa incomplete

(*b*) कुवलयानन्दः.

KUVALAYĀNANDAḤ.

Foll. 43*a*—93*b*.

Same work as the one described under R. No 192 *ante*.

Incomplete.

(*c*) कारिकावली—मुक्तावलीसहिता.

KĀRIKĀVALĪ WITH MUKTĀVALĪ.

Foll. 94*a*—105*b*. Fol. 106 is left blank.

Same work as the one described under Nos. 3928 and 3939 of the D.C.S. MSS., Vol VIII.

Incomplete.

R. No. **511.**

Palm-leaf. 18½ × 1½ inches. Foll. 131. Lines, 7 in a page. Grantha. Much injured.

Presented in 1911-12 by Śrīraṅganārāyaṇa Jīyar of Srirangam.

Foll. 3 and 4 are left blank

कात्यायनश्रौतसूत्रभाष्यम्.

KĀTYĀYANAŚRAUTASŪTRABHĀṢYAM.

A commentary on the Śrautasūtras of Kātyāyana: by Karki.

The former owner of the manuscript is said to be Nārāyaṇaśrauti.

Contains Adhyāyas 19 to 30 and 32

Beginning:

पूर्वान्तात् पूर्वान्तेन मध्यमो भागः । अर्धतृतीयानि शता(नि) शतानि मध्यमो भागः । एवमितरौ भागौ अर्धतृतीयानि शतानि । तस्मिन् रज्वा लिखिता

* * * *

वेदविहितान्युक्तानि साङ्गानि कर्माणि । तत्समनन्तरं च उद्गातृवेद· विहितानि । इदानीं तेषामेव नैमित्तिकागमव्याचिख्यासये . . . . धर्मोपपाते प्रायश्चित्तं तत्कालं कर्मणः । उपपातो विनाश इत्यनर्थान्तरम् ।

* * * *

वेदत्रयविहितकर्मसंयोगात् ब्रह्मण एवेति ॥

Colophon:

इत्युपाध्यायकर्किकृतौ कातीयसूत्रविवरणे एकोनविंशोऽध्यायः । प्रायश्चित्तं समाप्तम् ॥

End:

इह शास्त्रे प्रत्यध्यायं विवाहं(ह)निषेधः समानप्रवराविवाहदोषगौरवप्रदर्शनार्थः । तावत्परीक्षमूर्ध्वरेघसः प्रजामिच्छन्ति संततं प्रजामिच्छन्ति संततमिति । (द्विरुक्तिः) समाप्तिप्रदर्शनार्था ॥

Colophon:

इत्युपाध्यायकर्किकृतौ कातीयसूत्रे द्वात्रिंशोऽध्यायः समाप्तः ॥

कातीयसूत्रभाष्याब्धि वेदार्थोर्मिभिराकुलम् ।
पूर्वपक्षसमाकीर्णं कीर्णं सिद्धान्तजालकैः ॥
यः कृत्वा पद्धतिं चक्रे तत्राप्युत्तरपद्धतिम् ।
तं वन्दे भाष्यकृच्छ्रेष्ठं कर्क्युपाध्यायपण्डितम् ॥

The subjects dealt with in the various Adhyāyas are—

१९. प्रायश्चित्तम्.
२०. अश्वमेधः.
२१. पुरुषमेधः.
२२. सर्वमेधः.
२३. पितृमेधः.
२४. प्रवर्ग्यः.
२५. परिभाषा.
२६. शुल्वम्.
२७. एकाहः.
२८. अहीनम्.
२९. सत्राणि.
३०. परिशिष्टम्.
३२. प्रवरः.

R. No. 512.

Śrītāla. 20¼ × 2¼ inches. Foll. 64. Lines, 16 in a page. Grantha and Telugu. Injured.

Presented in 1911-12 by Śrīranganārāyaṇa Jīyar of Srirangam.

(a) भार्गवपुराणम्.

BHĀRGAVAPURĀṆAM.

Foll. 1a—28b.

Same work as the one described under No. 2352 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

Foll. 29 to 31 are left blank.

(b) कृष्णकर्णामृतम्—सुवर्णचषकसहितम्.

KṚṢṆAKARṆĀMṚTAM WITH SUVARṆACAṢAKA.

Foll. 32a—61a. Foll. 46b and 61b are left blank.

A poem in praise of Lord Kṛṣṇa by Līlā-śuka. The author of the commentary is Pāpayallayasūrin, son of Tirumalōpādhyāya and Koṇḍamāmbā.

Adhyāyas one and two complete.

Beginning:

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनावृतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।
स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥

अस्तीति । स्वस्तरुणीनां नाकस्त्रीणां कराग्रेभ्यो विगलत्कल्पप्रसूनैः पतत्पारिजातादिकुसुमैः आवृतं व्याप्तं पूजितमित्यर्थः । प्रस्तुतस्य वर्तमानस्य वेणुनादस्य लहर्या उत्पत्तेर्जायमानं यन्निर्वाणं सुखं तेन निर्व्याकुलं निश्चलचित्तम् ।

End:

ओंकारार्थं ब्रह्म उदीरयन् प्रतिपादयन् अखण्डानन्दाविर्भावसंपादकः सन्नित्यर्थः । शिशोः कृष्णस्य वंशीनिनादः विजयते सर्वोत्कर्षेण वर्तते । विपराभ्यां जेरित्यात्मनेपदम् ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणवसुमतीतिरुमलोपाध्यायपुत्रेण कोण्डमाम्बागर्भशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां कर्णामृतव्याख्यायां सुवर्णचषकसमाख्यायां द्वितीयोऽध्यायः ॥

Fol. 62*a* contains a few lines of a commentary on Kālāmṛta. Fol. 62*b* is left blank. Fol. 63 contains a few lines from the minor Śrī-vaiṣṇava theological tracts Fol. 64*a* contains a few lines of a commentary on Ratirahasya. Fol. 64*b* is left blank.

R. No. 513

Paper. 7 × 3¼ inches. Foll. 4. Lines, 6 in a page. Dēvanāgarī. Good.

Presented in 1911–12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

कार्त्तिकव्रतोद्यापनम्.

KĀRTTIKAVRATŌDYĀPANAM.

On details connected with the performance of a religious vow on the 14th day of the bright fortnight in the month of Kārttika. Its performance is considered to have the power to absolve a person from his sins.

Complete, as found in the 24th Adhyāya of the Kārttikamāhātmya of the Sanatkumārasaṁhitā.

Beginning:

अथोर्जव्रतिनः सम्यगुद्यापनमथोच्यते ।
ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥
तुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां शुभाम् ।
तुलसीमूलदेशे तु सर्वतोभद्रमेव च ॥

End:

यत्कृत्वा सर्वपापेभ्यो मुक्तो भवति तत्क्षणात् ।
अतः परं किं वक्ष्यामि ब्रूह्यात्रेय च सत्वरम् ॥

Colophon:

इति सनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये चतुर्विंशोऽध्यायः ॥

R. No. 514.

Palm-leaf. 16⅜ × 1⅜ inches. Foll. 34. Lines, 7 in a page. Grantha. Good.

Presented in 1911–12 by Śrīraṅganārāyaṇa Jīyar of Srirangam.

Fol. 34*b* is left blank.

कुरुकापुरीमाहात्म्यम्.

KURUKĀPURĪMĀHĀTMYAM.

Deals with the holiness and religious importance of a place called Kurukāpurī, now called Tirukkuruhūr, in the Tinnevelly

district: famous on account of a temple dedicated to Viṣṇu and as being the birth place of Śaṭhakōpa *alias* Nammāḻvār.

Complete, as found in the Brahmāṇḍapurāṇa.

The former owner of the manuscript is stated to have been one Periyanambi Ayyaṅgār. The transcription of the manuscript is said to have been completed on Friday, the 1st day of the bright fortnight, which is the 23rd of the month of Āḍi, in the year 1329(?)

Beginning:

पाराशर्यमुनिश्रेष्ठमासीनं गन्धमादने ।
समाजे मुनिवर्याणां शुको वचनमब्रवीत् ॥
श्रीमन् वेदान्ततत्त्वार्थविवेचनविशारद ।
त्वं सर्वज्ञतमस्तात साक्षान्नारायणो गुरो ॥

* * * *

कथान्तरेषु बहुधा कथितं भवता पुरा ।
कुरुकाख्यं हरिक्षेत्रं तन्माहात्म्यं न तूदितम् ॥

End:

ताम्रपर्णी च कुरुकाक्षेत्रं चाधीश्वरो हरिः ।
तन्माहात्म्यकथा चेयमतिपुण्यं चतुष्टयम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रमाहात्म्यकाण्डे श्रीकुरुकामाहात्म्ये चतुर्थोऽध्यायः ॥

R. No. **515**.

Palm-leaf. 12½ × 1⅝ inches. Foll. 22. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1911–12 by Śrīnivāsarāghavācāriyar of Conjeevaram.

(*a*) कूश्माण्डहोमः.

KŪŚMĀṆḌAHŌMAḤ.

Foll. 1*a*—4*b*.

Similar to the work described under No. 3595 of the D.C.S. MSS., Vol. VII.

Complete.

(b) तुलसीग्रहणादिनियमः.

TULASĪGRAHAṆĀDINIYAMAḤ.

Foll. 5a—7b.

On the regulations to be observed in plucking Tulasī leaves for religious purposes.

Complete.

Beginning:

भौमवारे चतुर्दश्यां मन्वादिषु . . . . . ।
पि (ये विचि)न्वन्ति तुलसीं ते कृन्तन्ति हरेश्शिरः ॥
सङ्क्रान्त्यां पक्षयोरन्ते द्वादश्यां निशि सन्ध्ययोः ।
तुलसीं ये विचिन्वन्ति ते कृन्तन्ति हरेश्शिरः ॥

End:

पर्णमूले सदा लक्ष्मीः पर्णाग्रे तु सरस्वती ।
पर्णमध्ये सदा ज्येष्ठा त्रिदेशं परिवर्जयेत् ॥

(c) आचार्यग्रन्थादिनिरूपणम्.

ĀCĀRYAGRANTHĀDINIRŪPAṆAM.

Foll. 8a—9a.

Gives the names of the various successive Ācāryas or authoritative Śrī-Vaiṣṇava religious teachers together with the extent in Granthas of the works written by them. By Brahmatantrasvatantrasvāmin of the Parakāla Mutt in Mysore.

Complete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . . सदा हृदि ॥
ब्रह्मतन्त्रस्वतन्त्रेण परकालयतीन्दुना ।
आचार्यावतारघट्टार्थः संग्रहेण प्रकाश्यते ॥

श्रीमद्वेदान्तसूक्ष्मार्थनिश्चयाय चलात्मनाम् ।
श्रीमानाद्यो गुरुः पञ्चलक्षग्रन्थानुपादिशत् ॥
चतुरश्चतुरो ग्रन्थान् श्रीशठारिस्ततो व्यधात् ।
ततः श्रीनाथयोगीन्द्रो ग्रन्थद्वयमुदाहरत् ॥

End:

परकालमुनेः प्रणितं (णतिं) कलये चिरकालकृतैः सुकृतैरमितैः ।
नरकापनयो यदधीनतरो नरकारिरयं यदुपान्त(गतः) ॥

Colophon:

इत्याचार्यावतारघट्टार्थः संपूर्णोऽभवत् ॥

(*d*) दिव्यसूरिस्तुतिः.
DIVYASŪRISTUTIḤ.

Foll. 9*a*—10*b*.

Similar to the work described under R. No. 173(*b*) *ante*. By Brahmatantrasvatantrasvāmin of the Parakāla Mutt.

Complete.

Beginning:

पितामहस्यापि पितामहाय . नमस्ते(स्तात्) ॥

* * * *

तुलायां श्रवणे जातं काञ्च्यां काञ्चनवारिजात् ।
द्वापरे पाञ्चजन्यांशं सरोयोगिनमाश्रये ॥

End:

ब्रह्मतन्त्रस्वतन्त्रोक्तां दिव्यसूरिवरस्तुतिम् ।
यः पठेत् प्रातरुत्थाय स भवेद्वैष्णवोत्तमः ॥
आचार्यानुग्रहात् सद्यः सर्वपापैः प्रमुच्यते ।
दृष्टे मनोरथान् प्राप्य त्वदृष्टे मोक्षमाप्नुयात् ॥

Colophon:

दिव्यसूरिस्तुतिः संपूर्णा ॥

(*e*) आचार्यजन्मनक्षत्रध्यानश्लोकाः.

ĀCĀRYAJANMANAKṢATRADHYĀNAŚLŌKĀḤ.

Foll. 10*b*—11*b*.

Similar to the work described under R. No. 173 (*c*) *ante.*

Complete.

Fol. 12 gives the details connected with an offering of Pāyasa.

(*f*) पञ्चगव्यप्रयोगः.

PAÑCAGAVYAPRAYŌGAḤ.

Fol. 13.

Similar to the work described under No. 3664 of the D.C.S. MSS., Vol. VII.

Complete.

(*g*) ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Foll. 14*a*—18*a*.

Same work as the one described under No. 3744 of the D.C.S. MSS., Vol. VI.

Complete.

Foll. 18*b* gives some stanzas relating to इज्योपदेश.

(*h*) वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Foll. 19*a*—20*b*.

Similar to the work described under No. 3801 of the D.C.S. MSS., Vol. VII.

Incomplete.

(i) जयादिहोमप्रयोगः.

JAYĀDIHŌMAPRAYŌGAḤ.

Foll. 21*a*—22*b*.

Same work as the one described under No. 3623 of the D.C.S. MSS., Vol. VII.

Incomplete

R. No. **516.**

Palm-leaf. 18 × 1½ inches. Foll. 8. Lines, 8 in a page. Telugu. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

प्रातिशाख्यम्—(कृष्णयजुस्).

PRĀTIŚĀKHYAM (BLACK YAJUS).

Same work as the one described under No. 928 of the D.C.S. MSS., Vol. II

Complete.

